ISBN : 978-93-83813-34-6

अन्ताराष्ट्रीयसंस्कृतसङ्गोष्ठी

INTERNATIONAL SANSKRIT SEMINAR

16 तथा 17 फेब्रुवरि - 2018

# संस्कृत-सुगन्धः

## (संशोधनलेखनानां संग्रहः)

प्रधानसम्पादकः
प्रा. जि.आर्.अम्बली

सम्पादकः
डॉ.श्रीकृष्णः ह.काखण्डकिः



संस्कृतविभागः
बी.एल.डी.ई. संस्थायाः
एस्. बी. कला तथा के.सी.पी. विज्ञान महाविद्यालयः
विजयपुरम् (कर्नाटकराज्यम्)

Scanned by TapScanner

# अन्ताराष्ट्रीयसंस्कृतसङ्गोष्ठी

**International Sanskrit Seminar**

16 तथा 17 फेब्रुवरि - 2018

**संशोधनलेखनानां संग्रहः**

# संस्कृत-सुगन्धः

प्रधान सम्पादकः

**प्रा. जि. आर्. अम्बली**

सह सम्पादकः

**डॉ. श्रीकृष्णः ह. काखण्डकि**

**सौम्य प्रकाशन**

'कंबीर कुंज', महाबलेश्वर कॉलनी,

विजयपुर - 586 103 (कर्नाटक)

Scanned by TapScanner

11. संस्कृतसाहित्ये ज्यौतिषम् 60
• विद्वान् डा. राघवेन्द्रः

12. संस्कृतवाङ्मये पर्यावरणपर्यालोचनम् 64
• बिस्वजित् बर्मन्

13. संस्कृतजगति पर्यावरणपर्यालोचनम् 69
• बिस्वजित् बर्मन्

14. अविश्रमोयं लोकतन्त्राधिकारः 74
• डा. प्रेमा नडकट्टी

15. संस्कृतभाषायाः स्तिथिः गतिश्च 81
• पि. रमेश शर्मा

16. संस्कृतसाहित्ये व्यवहारकौशलम् 87
• श्री. के. जि. महेश

17. भासनाटकचक्रे मानवीयमौल्यानि 90
• कुमारः बागेवाडिमठः

18. संस्कृतसाहित्ये विज्ञानपरम्परा 93
• प्रो. जि. आर्. अम्बली

19. संस्कृतसाहित्ये अष्टाङ्गयोग 101
• विद्वान् पि. लक्ष्मणशर्मा

20. संस्कृतसाहित्ये योगविचारः 107
• डा. हेच्. रविचन्द्रः

21. श्रीमद्रामायणस्य सुन्दरकाण्डे समुल्लसितानि मानावीयमौल्यानि 114
• डॉ. पि.पि.वि.डि नाग त्रिशूलपाणि

# संस्कृतसाहित्ये विज्ञानपरम्परा

• प्रो. जि. आर्. अम्बली

**पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।**
**पूर्णस्य पूर्णमादय पूर्णमेवावशिष्यते ।।**

भारतदेशः अपञ्चसहवर्षेभ्यः ज्ञानविज्ञानयोः क्षेत्रमस्ति। क्रि.श. 12 शतकपर्यन्तं विज्ञानस्य गतिः अप्रतिहता आसीत्। परं पश्चात् वैदेशिकाः प्रबलमभियानं प्रारभन्त। तदा चिन्तनशीलतैव कुण्ठिता अभवत् । अतः विज्ञानस्य अभिवृद्धिः प्रायः स्थगिता। परन्तु विज्ञानक्षेत्रे अस्मांक प्राचीनानां साधना प्रकृष्टा प्रतिभाति। अधुना विज्ञानक्षेत्रे नातीव प्रगतिशीलाः इति केचन कथयेयुः। प्राचीनकाले भारतदेश-वासिभिः विज्ञाने कापि प्रगतिः न साधिता इति केचन भावयेयुः। अतः अस्मिन् विषये किञ्चित् वस्तुनिष्ठतया विचार्यते। क्रिस्तपूर्व सहस्रत्रयवषैभ्योऽपि प्राक् उत्तमा नागरिकता सिन्धु-नदीतीरे अभिवृद्धा आसीत्। तत्र श्रेष्ठिानि नागराणि निर्मितान्यासन्। येषां निर्माणं वैज्ञानिकीं प्रगति विना न सम्भावयितुं शक्यम्। वेदकाले भारतीयाः अङ्कादिगणनासु खगोलपरिज्ञाने वैद्यशास्त्रेच प्रगतिं साधितवन्तः इति प्रतिभाति। वेदोत्तरकालिकेषु शुल्बादि सूत्राग्रन्थेषु रेखागणितस्य ज्ञानमपि प्रकर्षमाप्नोत इति गेचरं भवति। लोहानां अयस्ताम्रस्वर्णादीनां परिशोधने च प्रावीण्यमासीदिति ज्ञायते। वेदशुल्बादिग्रन्थाः विज्ञानस्य बोधनायन प्रवृत्ताः किन्तु ज्ञानबोधनाय प्रवृत्तेषु तेषु तत्रतत्र तदानीन्तनस्य विज्ञानस्य प्रगतेः प्रतिफलनं गोचरीभवति। तत्रत्यानां परिकल्पनानां आधारेण अस्माभिः तास्ताः विज्ञानसिद्धयः ऊहनीयाः भवन्ति। तदुत्तरकाले विज्ञानस्य तासु तासु शाखासु अभिवृद्धासु तत्तद्विषये निष्कृष्ठतया च ग्रन्थाः मेधाविभिः विरचिताः। उभयदृष्टयापि अस्माभिः विज्ञानपरम्परा वीक्षणीया ।

संस्कृतवाङ्मयं द्विधा विभक्तुं शक्यम्- अध्यात्मिकं भौतिकं चेति। आध्यात्मिकं नाम केवलं देवस्तुतिपरं न। तत्र सर्वे शास्त्रीयविषयाः अपि अन्तर्भवन्ति। वेदाः, वेदाङ्गानि, उपवेदाः, पुराणानि, इतिहासः, धर्मशास्त्रं, दर्शनानि इत्यादियः सर्वे आध्यात्मिकसाहित्यशब्देन निर्दिश्यन्ते। पुराणादयः विविधशास्त्रतत्वानि प्रतीकात्मकतया निरुपयन्ति । दशावतारकथा परिणामगट्ट निरुपयति। हयग्रीवकथा मनुष्य हययोः मस्तिषकसाम्यं प्रतिपादयति। एतादृशानि बहूनि उदाहरणानि प्रदर्शयितुं शक्यानि। भौतिकविषयेषु विज्ञानं, सामूहिकं, साहित्यं चेति त्रयः भागः । विज्ञाने गणितं, भौतशास्त्र, रसायनशास्त्रम्, जीवशास्त्रम्, इत्यादयः गण्यन्ते। सामूहिके इतिहासः, अर्थशास्त्रम्, राज्यशास्त्रम्, भूगर्भशास्त्रम्, इत्यादयः अन्तर्भवन्ति। साहित्ये च दृश्य-श्रव्य-मिश्रभेदाः परिगण्यन्ते। संस्कृतस्य आध्यात्मिक साहित्यिकं च वैशिष्ठ्यं सर्वैः ज्ञातचरम् एव इत्यतः तदत्र न परामृश्यते ।

## सामूहिकम्

सामूहिकविषयम् अधिकृत्य पाश्चात्यानां पौनःपुन्येन कथनं श्रूयते यत् भारतीयानां इतिहासप्रज्ञा नास्ति, कालगणनानैपुण्यं । नास्ति इति। किम् इतिहासः नाम केचन वर्षविशेषाः कानिचित् नामानि, काश्चित् पराजयगाथाः च? विद्यालये यत् इदानीं पाठ्यते तावन्मात्रकः एव किं भवती इतिहासः? इतिहासपाठनस्य उद्देशः कः इति आदौ परिचिन्तनीयम्। सुन्दरस्य भविष्यस्य निर्माणं एव इतिहासस्य लक्ष्मम् इति मम मतिः। अतः एव खलु स्वामी विवेकान्दः उक्तवान् यत् येषाम् उत्कृष्टः भूतकालः अस्ति तेषाम् एव भविष्यत्कालः उत्तमः सम्भविष्यति इति । एताः वर्ष-नाम-पराजयगाथाः पठामः चेत् किं पूर्वोक्तं लक्ष्यं सिद्ध भवेत् ? तादृशं लक्ष्यं साधयितुं रामायण-महाभारतादीनां पठनम् एव उत्तमं साधनं खलु?

'कालगणनानुसारी इतिहासः भारते नास्ति इत्यतः एषा युक्तिः खलु उपस्थाप्यते?' इति केचित् वदेयुः। तत् तु सर्वथा असमञ्जसम्। राजतरङ्गिण्यादयः ऐतिहासिकाः ग्रन्थाः अत्र सन्ति एव बहवः।

ये 'सेकेण्ड्' नामकं कालं लघुतमं मन्यन्ते, ये च वर्षम् एव बृहत्तमं मन्यन्ते, ते लवस्य परार्धस्य च उपयोगकर्तॄणां अस्माकम् उपहासं यत् कुर्वन्ति तत् पङ्गुना खञ्जेन का कृतः पादवतः उपहासः इव भवति ।



## भूगर्भशास्त्रम्

भूमेः गोलाकृतिम् ऐदम्प्राथम्येन मागल्नामकः प्रतिपादितवान् इति वयं पद्यपुस्तकेषु पठामः। संस्कृतभाषायां तु आप्राचीनकालतः व्यवहारः 'भूगोलम्' इत्येव। एषः व्यवहारः एव खलु समर्थयति भूमेः गोलाकारताम्? धिक् मेकालेपुत्राणां विशेषबुद्धिम्! अपि च गोलपरिभाषायाम् उच्यते-

**मृदम्बगन्यनिलाकाशपिण्डोऽयं पाञ्चभौतिकः।**
**कपित्थफलवद्वृत्तः सर्वकेन्द्रे खिलाश्रयः ।।**
**स्थिरः परेशशक्त्येव सर्वगोलादधः स्थितः ।**
**मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति ।।**

भूमिः पञ्चभूतात्मिका, कपित्थफलाकारिका च इति अत्र स्पष्टतया निरूपितम् अस्ति। कपित्थफलाकारकत्वं नाम दैर्घ्याधिक्ययुक्तगोलत्वम्। 'भूकेन्द्रं' प्रति सर्वम् आकृष्टं भवति। अन्यतौ किमपि अनाश्रित्य आकर्शणशक्तया (परेशशक्त्या) निरालम्बा भूमिः व्योम्नि तिष्ठति' इति एतस्मात् श्लोकात् ज्ञायते। आर्यभटः भूव्यासमधिकृत्य वदति 'त्रिला भूः' इति। तन्नाम भूव्यासः 1050 योजनमितः भवति। (1050X12=12600 किलोमीटर) आधुनिकाः अपि एतत् एव परिमाणं प्रतिपादयन्ति। भूमिः एव भ्रमति इति, सौरमण्डलमपि पराशक्तिं केन्द्रीकृत्य भ्रमतीति अस्मत्पूर्वजैः सिद्धन्तिम्। कालिदासस्य काले भूशास्त्रविज्ञानं कथम् आसीत् इति मेघदूतकाव्य पठनात् स्फुटीभवति।

'भूभत्' इति पर्वतस्य पर्यायपदम्। पर्वताः भूतोलनं. साधयन्ति इति आधुनिकाः अपि अङ्गीकुर्वन्ति। श्रीकृष्णवलासकाव्ये भूमिब्रह्मसंवादे भूस्थितिः भूकम्पनम्, सूर्यरश्मिमहिमा इत्यादयः विषयाः काव्यशैल्या प्रतिपादिताः सन्ति। दिनचलनम्, वार्षिकचलनम्, अयनम्, ग्रहणम्, समरात्रम् इत्यादयः बहवः विषयाः अतिप्राचीनकाले एव भारते चर्चिताः आसन्। भूगुरुत्वाकर्षणविषये भास्कराचार्येण विषदतया प्रतिपादितम्।

## गणितम्

आधुनिक गणकयन्त्रम् अपि अतिशेते भारतीया वेदागणितपद्धतिः। शून्यं, दशांशपद्धतिः संख्याः, पै($\pi$) मूल्यम् इत्यादयः बहवः अंशाः भारतीयानां कारणतः एवगणितक्षेत्रं प्रविश्टवन्तः 'पैथागोरियस् सिद्धान्तः' इति



Scanned by TapScanner

यत् इदानीं पाठ्यते (कर्णवर्गः=पादवर्गः+लम्बवर्गः) स च सिद्धान्तः पैथागोरस्य जननात् त्रिशतवर्षपूर्वम् एव भारते शुल्बसूत्रे निरुपितः आसीत्। भास्कराचार्येण लीलावत्यां- 'तत्कृत्योर्योगपदं कर्णः, दोषकर्णवर्गयोर्विवरात्।

**मूलम् कोटिः कोटिश्रुतिकृत्योः, अन्तरात् पदं बाहुः।' इति उच्यते ।**

पिङ्गलाचार्यः छन्दशास्त्रे मेरुप्रस्तारमधिकृत्य यत् प्रतिपादयति तदेव 'पास्काल् नामकेन अन्विष्टाम्' इति वयं पाठ्यपुस्तकेषु पठामः। अहो! विचित्रा अस्माकं विद्याभ्यासरीतिः।

## भौतशास्त्रं

ऊर्जसंरक्षणनियमः अणुसिद्धान्तः, द्रव्यनिर्माणाम्, इत्यादयः विषयाः वैदिककालादास्भ्य भारते प्रसृताः दृश्यन्ते। शब्दस्य प्रकाशस्य च गतिः स्वभावदयश्च न्यावैशेषिकमीमांसादिषु चर्चाविषयाः जाताः दृश्यन्ते। शब्दः वायौ प्रचयम् (Contention) अपचयं (Rarefaction) च निर्माय सञ्चरति। तरङ्गरूपस्य (Reflection) अप्रभ्रंशः (Refraction) इत्यादयः विषयाः तर्कशास्त्रे दृश्यन्ते। एते विषयाः वात्सायनभाष्ये 'रश्मिपरावर्तन शब्देन निर्दिष्टाः। प्रकाशवेगः, द्वैतस्वभावः (Dual nature) इत्यादयः क्रिस्तीय नवम शतके (क्रि.श 9) जातेन आचार्यवाचस्पतिमिश्रेण विरचितायां तात्पर्यटीकायां प्रतिपादिताः।

ऐते च विषयाः पाश्चात्यपण्डितैः सप्तदशे शतके ज्ञाताः। काण्टम्-सिद्धान्तम् अधिकृत्य अपि उपनिषत्सु चर्चा कृता दृश्यते। सायणाचार्यः प्रकाशस्य वेगं एवं प्रतिपादयति-

'योजनानांसहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमेषार्धेन क्रमाणामाणा नमोस्तु ते।। इति।

अस्याः व्याख्याने प्रकाशकवेगाः 74000 क्रोशमितः

(18500 मैल् परिमितिः) इत्युक्तमस्ति । आधुनिकाःच प्रकाशवेगं 186202'3960 मैल् मितंवदन्ति।

ऊर्ज पिण्डास्य आनुपातिकम् अस्ति (E=mc2) इति ऐन्सटुन् महोदयस्य दर्शनम् इति वादः श्रूयते। 'त्वष्टुयन्त्रभ्रमिभ्रन्तमार्ताण्ड ज्योतिरुज्जवलाः' इति



भवभूतेः प्रयोगं पश्यन्तु भवन्तः। विश्वकर्मणः पुत्री संज्ञा सूर्यवधूः जाता। किन्तु सूर्यस्य अधिकतेजसा पीडयमानया संज्ञया पिता बोधितः। सः पिता सूर्यं त्वष्टृयन्त्रम् आरोप्य ऊर्जन्यूनतां चकार इति पौराणिककथा। ऊर्जापिण्ड बन्धनं निरूपयति खलु एषा कथा।

एकदा 'सैन्स् टुडे' नामिकायां पत्रिकायां प्रकासितं ऐन्सिटन् महोदयस्य वाक्यमत्र स्मरणीयम्। तत् वाक्यम् अस्ति-

'You hail from India in the name of Hindu Philosophy, yet you have not cared to learn Sanskrit. Come along, see my literary which treasures on hindu Philosophy. They are the main source of my inspirations and guidelenes for the purpos of scientific investigations and formulation of theories.

## विमानयानशास्त्रम्

वायुप्रवाहतः उत्पन्नम् ऊर्ज, सौरोर्जम्, इतरेन्धनोर्जं च उपयुज्य सञ्चार्यमाणानि विमानानि अत्र आसन्। भारद्वाजमहर्षेः यन्त्रसर्वस्वम्, अगस्थस्य शक्तिसूत्रम्, ईश्वरस्य सौदामिनीकला, भारद्वाजस्यैव अंशुमत्तन्त्रं, शाकटायनस्य वायुतत्वप्रकरणं वैश्वमारुततन्त्रं च, नारदस्य धूमप्रकरणम् इत्यादीनां विमानशास्त्रसम्बध्दानां ग्रन्थानां उल्लेखाः दृश्यंते। भोजस्य समरागणसूत्रधारं शौनकमहर्षेः व्योमयानतन्त्रम्, गर्गस्य यन्त्रकल्पः, नारायणस्य विमानचन्द्रिका, चक्रायनिमुनेः केतुयानप्रदीपिका इत्यादयः अनेके ग्रन्थाः अपि विमानशास्त्रसम्बध्दाः एव।

विमानस्य अवरोहणकाले, भूस्पर्शसमये चैव अपघातस्य सम्भावना अधिका इति भारद्वाजमहर्षिः कथयति। अद्यापि खलु सा ए स्थितिः? विस्तारभयात् विषयोऽयं न विस्तार्यते।

## रसतन्त्रम्

रसतन्त्रविषये संस्कृतग्रन्थाः बहवः सन्ति। वाग्भटस्य रससमुच्चयः एतेषु प्राधान्यम् आवहति। शिल्परत्नं, विष्णुधर्मोारं, मानससारं, मानसोल्लासं, रससंहिता, इत्यादयः रसतन्त्रस्य विविधविषयान् प्रतिपादयन्ति। स्फटिकं, काचः (लेन्स्), वर्णः, सुधा(सिमेन्टौ), निर्यासः, सुगन्धवस्तूनि, कागदं,

लोहाः, विशिष्टमृत्पात्रणि इत्यादीनां पदार्थानां निर्माणं, रसप्रक्रिया च एतेषु ग्रन्थेषु निरुपिताः सन्ति। अत्र अनेकविधानि आम्लानि (Acids) क्षाराणि (Bases), च उल्लिखितानि। एतेषाम् उपयोगेन कृत्रिमपदार्थानं निर्माणाय अपेक्षिता साङ्केतिविद्या अपि तेषु प्रतिपादिता।

चिकित्सायामपि अस्य रसतन्त्रशास्त्रस्य उपयोगः आसीत् । पातञ्जलमहर्षेः लोहशास्त्रं जातस्य नागार्जुनस्य रसरत्नकरग्रन्थः लोहालयनिर्माणार्थं साङ्केतिकव्यवस्थां निरुपयति। परीक्षणशालायाः रचनं, तत्रत्यानि उपकरणानि, एकैकस्याः अपि प्रक्रियायाः कृते आवश्यकाः तापविशेषाः, रसतः औषधनिर्माणरीतिः इत्यादयः अपि अस्मिन् ग्रन्थे सन्ति। रसस्तम्भनादयः नवदशप्रक्रियाः अपि अत्रैव वण्यन्ते । एकादशशतकीयः (क्रि.श-11) रसार्णवग्रन्थः लोहस्य विविच्य ज्ञानाय ज्वालापरीक्षणाव्यवस्थां वर्णयति। देहलीस्थः विष्णुस्तम्भः अजन्ताचित्राणि च भारतीयतन्त्रज्ञानस्य प्रत्यक्षोदाहरणानि सन्ति।

## जीवशास्त्रम्

चरकसंहिता, सुश्रुतसंहिता, अष्टाङ्गहृदयं भावप्रकाशः इत्यादयः प्रसिद्धाः आयुर्वेदग्न्थाः केचन। शास्त्रक्रिया, प्रतिरोधचिकित्सा च प्राचीनकालात् एव अत्र आसीत् । 128 तमे क्रिस्ताब्दे भोजराजस्य मस्तिष्कशास्त्रक्रियां जीवकः नाम वैद्यः कृतवान् इति श्रूयते। सुश्रुतसंहितायां शास्त्रक्रियोपकरणानि शास्त्रयन्त्रादीनि बहूनि उल्लिखितानि। भावमिश्रस्य भावप्रकाशे रक्तसञ्चारविषये अपि उच्यते। चिकित्सार्थं मोहनिद्रायाः (हिप्नाटिसम्) उपयोगः भारते एव ऐदम्प्रथम्येन कृतः।

वृक्षायुवेदः गजायुर्वेदः, अश्व युर्वेदः इत्यादयः निरवधिशाखाः तिर्यग्जीवशास्त्रम् अधिकृत्य प्रवृत्ताः ।

हयलीलावत्याम् अश्वानां स्वभावः गुणाः च उपवर्णिताः । तेषां रोगाः, तच्चिकित्सा, तेषाम् आहारः इत्यादयः अपि तत्र वर्णिताः। 'मृगवैद्यकस्य पिता' इति विख्यातेन शालिहोत्रेण ह्यलक्षणम्, अश्वप्रश्नः इत्यादयः ग्रन्थाः रचिताः। गौतमस्य नवायुर्वेदः, पालकाव्यस्य हस्त्यायुर्वेदः च लोके प्रसिध्दौ। वराहमिहिरस्य बृहत्संहिता वृक्षशुश्रूषाम् अधिकृत्य वदति ।



## ज्योतिशास्त्रम्

असंख्याः ग्रहाः सन्ति, अन्यसौरमण्डलानि अपि भवितुम् अर्हन्ति इत्यादयः विचाराः भारतीये ज्योतिशशास्त्रे रूढमूलाः सन्ति। ग्रहणां स्थितिः परस्पराकर्षणं, ग्रहणस्वरूपं इत्यादयः अत्र विस्तरेण उक्ताः। कुजग्रहस्य स्वरूपं 'चपलः सरक्तगौरः मज्जासारश्च माहेयाः' इत्येवम् उक्तवान् अस्ति आचार्यवराहमिहिरः। आधुनिकशस्त्रकाराः वदन्ति 'कुजस्य उपरि उग्रतुषारावरणम् अस्ति इत्यरः रक्तवर्णयुक्तबलवर्णः तत्र दृश्यते; इति। 'कुजः' (भूमिपुत्रः) इतिशब्दः एव तद्ग्रहे जीवसम्भाव्यतां प्रकाशयति। आधुनिकाः अपि एतद्देव वदन्तिखलु ?

'सूर्यादीनां सञ्चारः भ्रममूलः' 'ग्रहणां स्वप्रकाशतानास्ति' इत्यादयः बहवः वैज्ञानिकाः अंशाः आर्यबटेन प्रतिपादिताः।

## वास्तुविद्या

सिन्धूसभ्यताचित्रणि प्रायः सर्वान् अपि आश्चर्यचकितान कुर्वन्ति एव। तत्रत्या वास्तुविद्या अतिप्राचीना अत्युत्कृष्टा च। कर्नाटके बेलूरे विद्यमानः भूमिस्पर्शरहितस्तम्भः, कोणार्क क्षेत्रस्य सूर्यदेवालयः, शृङ्गेरिस्तम्भाः, अनन्तपुरिस्ताः सप्तस्वरप्रभवाः, मण्डपाधारः स्तम्भाः, अजन्ता-एल्लोरगुहाः, देहलिस्थः विष्णुस्तम्भः इत्यादयः अनेके आंशाः भारतीय वास्तुविद्यायाः गरिमाणं प्रांणकुर्विन्ति। मयमतम्, मयसारः, मनुष्यालयचन्धिका, सुप्रभेदागमः वास्तुरत्नावली, कामिकागमः, वृहद्वास्तुमाला, इत्यादिषु अनेकेषु ग्रन्थेषु वास्तुशास्त्रं निरूपितम् अस्ति।

## सङ्गीतम्

सङ्गीतमधिकृत्य न बहु वक्तव्यमस्ति। यतः एतद्विषये सर्वे जानन्ति एव। चिकित्सार्थम् अपि सङ्गीतमुपयुज्यते स्म अस्मदाचार्यैः । 'सङ्गीतचिकित्सारत्नाकरः' नामकः ग्रन्थः 34800 रोगाणां विषये विस्तरेण वदति। तेषां चिकित्सापयोगिताम् अपि प्रतिपादयति सः।

विविधेषु अवसरेषु लब्धाः विषयाः मया अत्र सूत्रीकृताः । एतेषु विषयेषु पठितृणां प्रवृत्तिः अस्तु इत्येव मम उद्देश्यः। नलन्दातक्षशिलासदृशाः विश्वविद्यालयाः पुनरपि भवन्तु इति मम आशा।



Scanned by TapScanner

एकैकः अपि संस्कृतज्ञः एकैकशास्त्रस्य पारङ्गतः सन् तत्तच्छात्रस्य परिरक्षणं प्रसारं च करोतु इति ममापेक्ष। भरतमाता पुनरपि जगद्गुरुस्थानम् आप्नोत् इति मम अभिलाषः।

**आधारग्रन्थाः**


**गोलपरिभाषा**

**भास्कराचार्यस्य लीलावती**

**संस्कृतसाहित्येतिहासः**

**आयुर्वेदपद्धतिः**

**भारतस्य विज्ञानपरम्परा**


■■


स्कृतविभाग्यस्य प्रमुखः, एस्. बि. कला के. सि. पी. विज्ञानमहाविद्यालयः, विजयपुरम्–586103





Scanned by TapScanner